| नवम: पाठः | ईश: कुत्र अस्ति? |
|---|---|

**स्मरणीयतथ्य :**

प्रस्तुत पाठ नोबेल पुरस्कार विजेता कवीन्द्र रवीन्द्रनाथ टैगोर की विश्वविख्यात कृति गीताञ्जलि के संस्कृत अनुवाद से संकलित है।

इसमें कवि ने ईश्वर की वास्तविक सत्ता को किसानों, मजदूरों और गरीबों में दर्शाया है।

वास्तव में नारायण दरिद्रों में ही बसते हैं। इसके अनुवादक को. ल. व्यासराय शास्त्री हैं।

## बहुविकल्पीया: प्रश्ना:

1. **रवीन्द्रनाथटैगोरस्य कृतिं चिनुत -**
   क. रश्मिरथी ख. आनन्दमठ
   ग. गीताञ्जलि: घ. मेघदूतम्

2. **"ईश: कुत्र अस्ति?" इति पाठ: कस्मात् ग्रंथात् संकलित: ?**
   क. गीताञ्जल्या: ख. रूपरुद्रीयात्
   ग. जातकमालाया: घ. चरकसंहिताया:

3. **गीताञ्जल्या: रचनाकार: क: ?**
   क. बंकिमचन्द्र: ख. रवीन्द्रनाथटैगोर:
   ग. कालिदास: घ. भारवि:

4. **लाङ्गलिक: किं करोति ?**
   क. सीव्यति ख. क्रीडति
   ग. कर्षति घ. पचति

5. **क: प्रस्तरखण्डान् दारयते?**
   क. कृषक: ख. क्रीडक:
   ग. शौचिक: ग. जनपदरथ्याकर्ता

6. **कवि: कां क्षेप्तुं कथयति ?**
   क. कन्दुकम् ख. शुद्धां शाटीम्
   ग. अवकर: घ. पुस्तकम्

7. **पाठानुसारम् ईश: कुत्र न अस्ति ?**
   क. कृषिक्षेत्रे ख. कठिनभूम्याम्
   ग. देवागारे घ. परिश्रमे

8. **नोबेलपुरस्कारप्राप्त: कवि: क: ?**
   क. कालिदास: ख. रवीन्द्रनाथटैगोर:
   ग. पाणिनि: घ. अम्बिकादत्तव्यास:

9. **कवि: कान् त्यक्तुं कथयति ?**
   क. गानं जपमालां च ख. पुस्तकानि
   ग. गृहाणि घ. मित्राणि

10. **समस्तं भुवनं क: सृजति ?**
    क. मानव: ख. ईश:
    ग. दानव: घ. यक्ष:

11. **गीताञ्जले: अनुवादक: क: ?**
    क. रवीन्द्रनाथटैगोर: ख. बंकिमचन्द्र:
    ग. व्यासरायशास्त्री घ. चन्द्रशेखरदासवर्मा

12. **किं हित्वा कवि: बहि: आगमनाय कथयति?**
    क. मार्गम् ख. ध्वानम्
    ग. शान्तिं घ. गृहम्

13. **जनपदरथ्याकर्ता कान् दारयते ?**
    क. प्रस्तरखण्डान् ख. मन्दिरम्
    ग. गृहम् घ. विद्यालयम्

14. **पाठे कवि: ईश्वरस्य सत्ता कुत्र दर्शयति ?**
    क. मन्दिरे ख. हृदये
    ग. गृहे घ. कठिनभूम्याम्

15. **यदि तव ---------- धूसरितं स्यात् ।**
    क. शरीरम् ख. वसनं
    ग. मन: घ. मस्तिष्कम्

16. **पाठे पिहितद्वारं कुत्र अस्ति ?**
    क. देवागारे ख. गृहे
    ग. हृदये घ. मस्तिष्के

17. **'जपमाला' इत्यस्य लिङ्गं किम् ?**
    क. पुंल्लिंगम् ख. स्त्रीलिङ्गम्
    ग. नपुंसकलिङ्गम् घ. न कोऽपि

18. **'निकटे' अस्य विलोमपदं किम् ?**
    क. दूरे ख. अग्रे
    ग. पश्चात् घ. पार्श्वे

19. **'कुसुमम्' इति पदस्य पर्यायपदं किम् ?**
    क. फलम् ख. कुपुत्र:
    ग. पुष्पम् घ. कुपुत्री

20. **'देवागारे' इति पदस्य क: अर्थ: ?**
    क. विद्यालये ख. देवालये
    ग. पुस्तकालये घ. अन्नागारे

© JCERT not to be republished

**21. 'सार्धम्' इत्यस्य अर्थं चिनुत-**

क. अर्द्धम्    ख. पूर्वार्द्धम्

ग. सह    घ. परार्द्धम्

**22. 'मिषन्' इत्यस्य अर्थं किम् ?**

क. पश्यन्    ख. पचन्

ग. धावन्    घ. खादन्

**23. 'वसनम्' अस्य पर्यायपदं किम् ?**

क. वासम्    ख. वस्त्रम्

ग. गन्धम्    घ. वेशम्

**24. 'त्यज' अत्र कः लकारः ?**

क. लट्    ख. लृट्

ग. लोट्    घ. लङ्ग

**25. 'कम्' अस्य मूलशब्दं चिनुत-**

क. किम्(पुं.)    ख. किम् (स्त्री.)

ग. किम् (नपुं)    घ. कवि

**26. ' कठिनां भूमिम् ' अनयोः पदयोः विशेषणपदं किम्?**

क. कठ्    ख. कठिन

ग. कठिनां    घ. भूमिं

**27. 'तिष्ठति' पदस्य मूलशब्दं चिनुत-**

क. तिष्    ख. तिष्ठ

ग. स्था    घ. स्थी

**28. 'ध्वानं हित्वा बहिरेहि त्वं ' अत्र अव्ययं चिनुत -**

क. ध्वानं    ख. हित्वा

ग. त्वं    घ. बहिः

**29. ' तव ' पदे का विभक्तिः?**

क. चतुर्थी    ख. पञ्चमी

ग. षष्ठी    घ. सप्तमी

**30. 'पश्यन्' पदे कः प्रत्ययः प्रयुक्तः ?**

क. अण्    ख. शतृ

ग. णिनि    घ. क्त

## उत्तराणि-

1. ग. गीताञ्जलिः
2. क. गीताञ्जल्या:
3. ख. रवीन्द्रनाथटैगोरः
4. ग. कर्षति
5. ग. जनपदरथ्याकर्ता
6. ख. शुद्धां शाटीम्
7. ग. देवागारे
8. ख. रवीन्द्रनाथटैगोरः
9. क. गानं जपमालां च
10. ख. ईशः
11. ग. व्यासरायशास्त्री
12. ख. ध्वानम्
13. क. प्रस्तरखण्डान्
14. घ. कठिनभूम्याम्
15. ख. वसनम्
16. क. देवागारे
17. ख. स्त्रीलिङ्गम्
18. क. दूरे
19. ग. पुष्पम्
20. ख. देवालये
21. ग. सह
22. क. पश्यन्
23. ख. वस्त्रम्
24. ग. लोट्
25. क. किम्(पुं.)
26. ग. कठिनां
27. ग. स्था
28. घ. बहिः
29. ग. षष्ठी
30. ख. शतृ

## अतिलघूत्तरीयाः प्रश्नाः

1. गीताञ्जलिः कस्य कृतिः ?
2. ईश्वरः काभ्यां सार्धम् तिष्ठति ?
3. कविः जनान् कुत्र गन्तुं प्रेरयति?

**निर्देशः - रिक्तस्थानं पूरयत-**

4. अस्मिन् ...............कं भजसे
5. स्वेदजलार्द्रः .............तिष्ठ।
6. ध्यानं हित्वा............. एहि ।
7. यदि तव ..................धूसरितं स्यात् ।



© JCERT not to be republished

**निर्देश: - अधोलिखितेषु सन्धिं कुरुत -**

8. तमोवृते + अस्मिन्
9. ईशः + तिष्ठति
10. बहिः + एहि

**निर्देश: - अधोऽङ्कितेषु सन्धिविच्छेदं कुरुत ।**

11. नास्त्यत्रेशः =........+.........+........+.........
12. पश्यस्तिष्ठ =............+...........
13. तन्निकटे =............+...........

## उत्तराणि-

1. रवीन्द्रनाथटैगोरस्य
2. वर्षातपयोस्ताभ्याम्
3. बहिः
4. पिहितद्वारे
5. तन्निकटे
6. बहिः
7. वसनं
8. तमोवृतेऽस्मिन्
9. ईशस्तिष्ठति
10. बहिरेहि
11. न + अस्ति + अत्र + ईशः
12. पश्यन् + तिष्ठ
13. तत् + निकटे

## लघूत्तरीया: प्रश्ना:-

1. मुक्तेः विषये कविः का कथयति ?
2. पाठानुसारम् ईश्वरः कुत्र अस्ति ?
3. समस्तं भुवनं कः सृजति ?
4. कविः किं चिन्तयितुं कथयति?
5. कविः किं त्यक्तुं कथयति?

**निर्देश: - अधोलिखितपदानां वाक्येषु प्रयोगं कुरुत ।**

6. सार्धम्-
7. सविधे-
8. हित्वा-
9. एहि-
10. धूसरितम्-
11. भवेत्-

## उत्तराणि-

1. **मुक्तेः विषये कविः कथयति यत् मुक्तिः कुत्रापि न अस्ति ।**
2. **पाठानुसारम् ईश्वरः क्षेत्रेषु लाङ्गलिकेषु अस्ति, ये कठिनां भूमिं कर्षन्ति, जनपदरथ्याकर्तासु अस्ति, ये प्रस्तरखण्डान् दारयन्ते।**
3. समस्तं भुवनम् ईश्वरः सृजति ।
4. कविः चित्ते तत्त्वमिदं चिन्तयितुं कथयति ।
5. कविः जपमालां, गानं, धूपं कुसुमं च त्यक्तुं कथयति।
6. सार्द्धम्- पित्रा सह सः आपणं गच्छति।
7. सविधे- ईश्वरः अस्माकं सविधे तिष्ठति ।
8. हित्वा- ध्यानं हित्वा बहिः आगच्छ।
9. एहि- मोहन! त्वं अत्र एहि ।
10. धूसरितम्- तस्य वसनं धूसरितम् अस्ति ।
11. भवेत्- जलं स्वच्छं भवेत् ।

## दीर्घोत्तरीया: प्रश्ना:

**निर्देश: - अन्वयं कुरुत-**

1. ईशस्तिष्ठति वर्षातपयो-

स्ताभ्यां सार्धं मलिनवपुः ।

दूरे क्षिप तव शुद्धां शाटी-

मेहि स इव पांसुरभूमिम् ॥

अन्वयः मलिनवपुः ईशः वर्षातपयोस्ताभ्यां सार्धं तिष्ठति। (अतः) तव शुद्धां शाटीम् दूरे क्षिप, स इव पांसुरभूमिम् एहि ।

2. तत्रास्तीशः, कठिनां भूमिं

यत्र हि कर्षति लाङ्गलिकः ।

यत्र च जनपदरथ्याकर्ता

प्रस्तरखण्डान् दारयते ॥

अन्वयः यत्र हि लाङ्गलिकः कठिनां भूमिं कर्षति। यत्र च जनपदरथ्याकर्ता प्रस्तरखण्डान् दारयते तत्रास्तीशः।

## (अपठितावबोधनम्)

3. अधोलिखितम् अनुच्छेदं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशम् उत्तरत-

© JCERT not to be republished

को न जानाति बोपदेवस्य कथां । सः बाल्यादेव मन्दमतिः छात्रः आसीत् । सः पठितांशं तत्कालं विस्मरति स्म । तेन तस्य सहपाठिनः अपि उपहासं कुर्वन्ति स्म । गुरुणा तिरस्कृतः इतस्ततः भ्रमन् सः मार्गे एकं कूपमपश्यत् । काश्चित् स्त्रियः तत्र जलेन घटानि पूरयन्ति स्म । मृदुघटेन शिलाखण्डे कृतं गर्तं दृष्ट्वा बोपदेवः विस्मितः जातः । यदि मृदुमृत्तिकायाः घटेन कठोरपाषाणे गर्तः सम्भवति चेत् पुनः पुनः अभ्यासेन अहं कथं विद्वान् न भविष्यामि इति निश्चयं कृत्वा सः अध्ययनार्थं प्रतिनिवृत्तः सफलो जातश्च ।

**प्रश्नाः (I) एकपदेन उत्तरत -**

(क) शिलाखण्डे कः गर्तः कृतवान् ?

(ख) सहपाठिनः किं कुर्वन्ति स्म ?

**(II) पूर्णवाक्येन उत्तरत -**

(क) किं निश्चित्य बोपदेवः प्रतिनिवृत्तः ?

(ख) घटानि काः पूरयन्ति स्म ?

**(III) यथानिर्देशम् उत्तरत -**

(क) 'भ्रमन्' इति पदे कः प्रत्ययः ?

(ख) 'कुर्वन्ति' इति क्रियापदे कः लकारः ?

(ग) 'पठितुम्' इत्यर्थे किं पदं गद्यांशे प्रयुक्तम् ?

(घ) 'मन्दमतिः छात्रः' अनयोः पदयोः किं विशेषणपदम् ?

## उत्तराणि-

**(I)**

(क) मृदुघटः

(ख) उपहासं ।

**(II)**

(क) मृदुमृत्तिकायाः घटेन कठोरपाषाणे गर्तः सम्भवति चेत् पुनः पुनः अभ्यासेन अहं कथं विद्वान् न भविष्यामि इति निश्चित्य बोपदेवः प्रतिनिवृत्तः।

(ख) घटानि स्त्रियः जलेन पूरयन्ति स्म ।

**(III)**

(क) शतृ

(ख) लट्लकारः

(ग) अध्ययनार्थम्

(घ) मन्दमतिः

© JCERT not to be republished